# शब्दमात्रात् न भेदव्यम्।

---

**Que.1. वृद्धा वनं गत्वा तत्र किञ्चित् कालं निर्भयम् अवसत्। वानराः एव घण्टां वादयन्ति इति ज्ञात्वा,वानरेभ्यः मधुराणि फलानि अयच्छत्। फलखादने मग्नेभ्यः वानरेभ्यः घण्टामादाय सा नृपं प्राप। [Marks :(5)]**

**इति कथाभागं पठित्वा शव्दमात्रात् न भेदव्यं इति पाठमाधारीकृत्य वृद्धायाः स्वभावं निरूपयत।**

**Ans.** आशयग्रहणं- १

भाषाशुद्धिः -२

स्वभावं निरूपयति चेत्-२

**Que.2. सूचनानुसारं चोराणाम् आपदः कारणमधिकृत्य टिप्पणीं लिखत । [Marks :(5)]**

**कश्चित् चोरः - व्याघ्रस्य आक्रमणेन हतः-वानराआगच्छन् - घण्टाम् अधून्वन् -राज्ञः उद्घोषणा -वृद्धायाः धैर्यं-सन्तुष्टः राजा।**

**प्रदत्तं सम्भाषणं पठित्वा चौर्यकर्म पापमेव -इति विषयमधिकृत्य टिप्पणीं लिखत ।**

**राजा- अरे सेवक,एषः चोरःकस्मात् चौर्यं अकरोत्**

**सेवकः-मन्दिरात् महात्मन्।**

**राजा-तदनन्तरं किं सञ्जातम्**

**सेवकः-व्याघ्रस्य आक्रमणेन चोरः मृतः।**

**राजा-चौर्यकर्म पापमेव। तत् कदापि न करणीयम्।**

**सेवकः-अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**

**परोपकारः पुण्याय पापाय परपीडनम्।।**

**Ans.** आशयग्रहणम् --१

भाषाशुद्धिः -- २

उचित लेखनम् -२

**Que.3. धीरस्य महत्वप्रतिपादकम् कमपि सुभाषितं लिखत । [Marks :(3)]**

**Ans.** उचित सुभाषित लेखनाय - ३

**Que.4. ओधोदत्तां खण्डिकां पठित्वा संभाषणांशान् पट्टिकारूपेण लिखत । [Marks :(3)]**

**हे राजन् ! घण्टाकर्णः हतः मया, इति । राजा तदा सेवकान् अपृच्छत्- हे सेवकाः ! अस्याः वाक्यं सत्यं वा ?**

**इति सेवकाः ताम् एवमपृचछत् - हे अम्ब,अत्रागच्छ ,भवत्या उक्तं सत्यं वा।**

**राजा** **वृद्धा** **सोवकाः**

**Ans.** उत्तराणि

राजा वृद्धा सोवकाः

हे सेवकाः ! अस्याः वाक्यं सत्यं वा ? हे राजन् ! घण्टाकर्णः हतः मया। हे अम्ब,अत्रागच्छ ,भवत्या उक्तं सत्यं वा।

**Que.5. अधोदत्तपदानि उदाहरणानुसारं पट्टिकारूपेण लिखत ।** **[Marks :(3)]**

**( चरितुं,भूत्वा,संभूय,पीत्वा,चलितुं,निशम्य)**

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तं |
|---|---|---|
| भूत्वा | संभूय | चरितुं |
| ------ | ------- | --------- |

**Ans.** क्त्वान्तम् ल्यबन्तम् तुमुन्नन्तं

भूत्वा संभूय चरितुं

पीत्वा निशम्य चलितुं

**Que.6. उदाहरणानुसारं लिखत।** **[Marks :(3)]**

**उदा-ससुखम् - सुखॆन सह वर्तते।**

**१.सस्नेहम् - -----------।**

**२.सामोदम् - ------------।**

**३. सानन्दम् - --------------।**

**Ans.** ससुखम् - सुखॆन सह वर्तते।

१.सस्नेहम् - स्नेहेन सह वर्तते।

२.सामोदम् - मोदेन सह वर्तते।

३. सानन्दम् - आनन्देन सह वर्तते।

**Que.7. उदाहरणानुसारं समस्तपदं लिखत।/उदाहरणानुसारम् एकपदं लिखत।** **[Marks :(3)]**

**उदा-भयं विना - निर्भयम्।**

**क. दोषं विना - ----------।**

**ख.आतङ्कं विना - -------------।**

**ग. अहङ्कारं विना - -------------।**

**Ans.** भयं विना - निर्भयम्।

क. दोषं विना - निर्दोषम्।

ख.आतङ्कं विना - निरातङ्कम्।

ग. अहङ्कारं विना - निरहङ्कारम्।

**Que.8. उदाहरणानुसारं पदानि विश्लेषयत।** **[Marks :(1)]**

**अथैकदा - अथ + एकदा।**

**अथैनम् - ------- + ---------।**

**इत्यवदत् - इति + अवदत्।**

**इत्यपृच्छत् - -------- + ----------।**

**सन्तुष्टो राजा - सन्तुष्टः + राजा।**

**सन्तुष्टो युवकः - ----- + ----------।**

**Ans.** अथैनम् - अथ + एनम्।

इत्यपृच्छत् - इति + अपृच्छत्।

१५. सन्तुष्टो युवकः - सन्तुष्टः + युवकः।

**Que.9. कर्तरि -कर्मणि प्रयोगयुक्ते वाक्ये विविच्य लिखत।** **[Marks :(4)]**

**क. गणेशः सूर्यं पश्यति।**

**ख.आचार्येण शिष्यः उपदिश्यते।**

**ग.बालेन पाठः पठ्यते।**

**घ.अध्यापिका विद्यालयं गच्छति।**

**Ans.** उत्तरम्- क. गणेशः सूर्यं पश्यति। कर्त्तरि प्रयोगः।

ख.आचार्येण शिष्यः उपदिश्यते। कर्मणि प्रयोगः।

ग.बालेन पाठः पठ्यते। कर्मणि प्रयोगः।

घ.अध्यापिका विद्यालयं गच्छति। कर्त्तरि प्रयोगः।

**Que.10. अधोदत्तन् संभाषणांशान् यथोचितं योजयत।** **[Marks :(3)]**

| अ | आ |
|---|---|
| **हे सेवकाः अस्याःवाक्यं सत्यं वा।** | **वृद्धा राजानं प्रति।** |

**हे राजन् ! घण्टाकर्णः हतः मया।** **सेवकाः वृद्धान् प्रति।**

**हे अम्ब ! अत्रागच्छ भवत्या उक्तं सत्यं वा।** **राज्ञः सेवकान् प्रति।**

**Ans.** अ आ

उत्तरम्-हे सेवकाः अस्याःवाक्यं सत्यं वा। राज्ञः सेवकान् प्रति।

हे राजन् ! घण्टाकर्णः हतः मया। वृद्धा राजानं प्रति।

हे अम्ब ! अत्रागच्छ भवत्या उक्तं सत्यं वा। सेवकाः वृद्धान् प्रति।

**Que.11. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।** **[Marks :(1)]**

**१.हितोपदेशस्य कर्ता कः**

**(नारायणपण्डितः,विष्णुशर्मा,चाणक्यः,कोट्टारत्तिल् शङ्कुण्णि)**

**२.पञ्चतन्त्रस्य कर्ता कः**

**(नारायणपण्डितः,विष्णुशर्मा,चाणक्यः,कोट्टारत्तिल् शङ्कुण्णि)**

**३.भयात् मुक्ताः- ----------**

**(भयान्मुक्ताः,भयन्मुक्ताः,भयेत्मुक्ताः,भयमुक्तः)**

**४.चित्रपुरनागरिकाःकिं श्रुत्वा भयाकुलाःअभवन्**

**(सिंहगर्जनम्, घण्डानादम्,वानररोदनम्,वृद्धायाः रोदनम्)**

**५.यः घण्डाकर्णं मारयति तस्मै बहूनि सुवर्णानि दास्यामि इति कस्य वचनम्**

**(राज्ञः,सेवकस्य,वृद्धायाः,घण्टाकर्णस्य)**

**Ans.** उत्तराणि-1.नारायणपण्डितः।

2.विष्णुशर्मा।

3.भयान्मुक्ताः।

4.घण्डानादम्।

5.राज्ञः।

**Que.12. शब्दमात्रात् न भेतव्यम् -इति कथायाः सन्देशः कः?** **[Marks :(2)]**

**Ans**. उचित सन्देशलेखनाय- २

**Que.13. उदाहरणानुसारं लिखत।** **[Marks :(2)]**

**उदा-अध्यापिका कक्ष्यां प्रविशति । छात्राः उत्तिष्ठन्ति।**

**यदा अध्यापिका कक्ष्यां प्रविशति तदा छात्राः उत्तिष्ठन्ति।**

**क. ऋष्य ऋङ्गःअङ्गराज्यम् आगच्छत्। वृष्टिः अजायत।**

**ख.सूर्यः अदयते । कुसुमानि विकसन्ति।**

**Ans.** क . यदा ऋष्य ऋङ्गःअङ्गराज्यम् आगच्छत् तदा वृष्टिः अजायत।

ख.यदा सूर्यः अदयते तदा कुसुमानि विकसन्ति।

**Que.14. अधोदत्तां खण्डिकां पठित्वा क्त्वान्तमव्ययानि चित्वा लिखत। [Marks :(2)]**

**घण्टानादं श्रुत्वा काचन वृद्धा वनं गत्वा तत्र किञ्चित् कालं निर्भयम् अवसत्।**

**Ans.** उत्तरम्-श्रुत्वा,गत्वा

**Que.15. अधोदत्तां खण्डिकां पठित्वा सम्बोधनपदानि चित्वा लिखत। [Marks :(2)]**

**हे राजान् घण्टाकर्णः हतः मया । राजा तदा सेवकान् अपृच्छत् - हे सेवकाः अस्याः वाक्यं सत्यं वा।**

**Ans.** उत्तरम्- हे राजान्,हे सेवकाः

**Que.16. अधोदत्तम् खण्डिकां पठित्वा क्त्वान्तमव्ययपदं चित्वा लिखत। [Marks :(2)]**

**कश्चित् चोरःमन्दिरात् बहूनि वस्तूनि चोरयित्वा वनं गतः। केचन वानराः कुतूहलेन तेषु वस्तुषु एकां घण्टां हस्ते धृत्वा अधून्वन्।**

**Ans.** उत्तरम्-चोरयित्वा,धृत्वा